# Shri Kamalamba Panchadashakshari Stotram

# શ્રીકમલામ્બાપઞ્ચદશાક્ષરીસ્તોત્રમ્

## Document Information

Text title : kamalAmbApanchadashAkSharIstotram

File name : kamalAmbApanchadashAkSharIstotram.itx

Category : devii, puShpAshrIvatsan, devI

Location : doc_devii

Author : Pushpa Srivatsan

Transliterated by : N V Vathsan nvvathsan at gmail.com

Proofread by : N V Vathsan nvvathsan at gmail.com

Source : Stotra Pushapavali

Latest update : September 27, 2022

Send corrections to : Sanskrit@cheerful.com

This text is entirely original composition of Smt. Pushpa Srivatsan, and copyright Smt. Pushpa Srivatsan. All rights reserved by the author. 1) **Under no conditions** can either the whole or any part of this composition be **translated**, **adapted**, or **used for commercial purposes**. 2) Neither the whole nor any part of this composition can be reproduced, recorded, used in public perfomances, or distributed in any other way without **prior written permission** from the copyright holder, the author Smt. Pushpa Srivatsan (contact N V Vathsan nvvathsan@gmail.com).

Please note that proofreading is done using Devanagari version and other language/scripts are converted using **sanscript**.

September 27, 2022

*sanskritdocuments.org*

# શ્રીકમલામ્બાપઞ્ચદશાક્ષરીસ્તોત્રમ્

ૐ

શ્રીરામજયમ્ ।

ૐ સદ્ગુરુશ્રીત્યાગરાજસ્વામિને નમો નમઃ ।

ૐ મન્ત્રદેવ્યૈ ચ વિદ્મહે । માતૃકાયૈ ચ ધીમહિ ।
તન્નઃ શિવા પ્રચોદયાત્ ॥

ધ્યાનાષ્ટકમ્ ।
સઙ્ગીતસદ્ગુરુસ્વામિત્યાગબ્રહ્મસુકીર્તિતામ્ ।
ગુરુકીર્તનસાનન્દાં વન્દે શ્રીકમલાલયામ્ ॥ ૧॥

શ્રીદીક્ષિતકૃતાશ્ચર્યનવાવરણકીર્તનામ્ ।
કીર્તનાપૂજ્યવાગ્દેવીં વન્દે શ્રીકમલામ્બિકામ્ ॥ ૨॥

કમનીયાતિલાવણ્યાં કમનીયમૃદુસ્વરામ્ ।
કલસુસ્વરગાનીયાં વન્દે શ્રીકમલામ્બિકામ્ ॥ ૩॥

નાદોપાસનસુપ્રીતાં નાદવિદ્યાતિદેવતામ્ ।
નાદસુસ્વરવાગર્થાં વન્દે શ્રીકમલામ્બિકામ્ ॥ ૪॥

વીણાસઙ્ગીતલોલાં ચ કલવીણાસ્વરસ્વરામ્ ।
વીણાલયાં સ્વરાહ્લાદાં વન્દે શ્રીકમલામ્બિકામ્ ॥ ૫॥

સઙ્ગીતસુસ્વરાં વાચાં સપ્તસ્વરસુનૃત્યકામ્ ।
સ્વરવિદ્યાર્થિસંશ્રાયાં વન્દે શ્રીકમલામ્બિકામ્ ॥ ૬॥

સપ્તસ્વરપરાનિષ્ઠાં સપ્તસ્વરસુવિગ્રહામ્ ।
સપ્તસ્વરસુપુષ્પાર્ચાં વન્દે શ્રીકમલામ્બિકામ્ ॥ ૭॥

કંદધાં કમલામ્બાં શ્રીકાદિવિદ્યોપચારિતામ્ ।
હાદિસાદીતિમન્ત્રાર્થાં વન્દે મન્ત્રસ્વરૂપિણીમ્ ॥ ૮॥

અથ સ્તોત્રમ્ ।

કલ્યાણી કલગીર્વાણી કામ્ભોજકરુણેક્ષણા ।
કલ્યાણસુવસન્તશ્રીઃ કીરવાણીસુખસ્વરા ॥ ૧॥

એકનિષ્ઠાભિનિધ્યાતા એકાક્ષરી સુશઙ્કરી ।
એકબ્રહ્મસ્વરૂપા ચ એકશબ્દસ્વરાલયા ॥ ૨॥

ઈશવામસુપાર્શ્વા ચ ઈશ્વરી જગદીશ્વરી ।
ઈશ્વરાનુગ્રહાપૂર્ણા ઈશસન્નુતપૂરણી ॥ ૩॥

લક્ષણાન્વિતપાદાઙ્ગા શુભલક્ષણલક્ષિતા ।
લગનીયા લસદ્રાગા લલિતા લલિતામ્બિકા ॥ ૪॥

હ્રીંકારમન્ત્રસદ્રૂપા હ્રીંકારમન્ત્રમોદિની ।
હ્રીંકારશબ્દસારાધ્યા હ્રીંકારશબ્દનાદિની ॥ ૫॥

હસિતોત્પલસૌન્દર્યા હંસાનન્દપ્રકાશિની ।
હંસનાદસુસઙ્ગીતા હંસગુહ્યપ્રસાદિની ॥ ૬॥

સઙ્ગીતસુસ્વરારાધ્યા સઙ્ગીતવરદાયિની ।
સઙ્ગીતસ્વરસાન્નિધ્યા સઙ્ગીતસ્વરભૂષણી ॥ ૭॥

કરાબ્જધૃતવીણા ચ કરવીણાસ્વરાલયા ।
સ્વરાજિતસુવીણા ચ કરવીણાલયસ્વરા ॥ ૮॥

હરિકેદારગૌલા ચ હરિપ્રિયસહોદરી ।
હરિનારાયણી ગૌરી હરિકામ્ભોજપાદભા ॥ ૯॥

લસચ્છવિપ્રભારૂપા લબ્ધવર્ણા લયાલયા ।
લાલિત્યમૃદુવાણી ચ લલિતસ્વરમાધુરી ॥ ૧૦॥

હ્રીંકારસ્વરસમ્પૂર્ણા હ્રીંકારધ્યાનભાસુરા ।
હ્રીંકારમન્ત્રગુહ્યાર્થા હ્રીંકારબીજગુમ્ફકા ॥ ૧૧॥

સકલાર્થપ્રદા માતા સકલાગમચારિણી ।
સકલાધરસઁલ્લાસ્યા સકલાઘપ્રણાશિની ॥ ૧૨॥

કલામયી કલારાધ્યા કમલાલયવૈભવા ।
કલસુસ્વરમાધુર્યા કલગાનપ્રસાદિની ॥ ૧૩॥

લયશુદ્ધિસુગારાધ્યા લયરાગરસાકૃતિઃ ।

લસત્સુમુખલાવણ્યા લયારામા લયારમા ॥ ૧૪॥

હ્રીંકારલયરાગા ચ હ્રીંકારપ્રીણિની સતી ।
હ્રીંકારમન્ત્રપાવિત્ર્યા હ્રીંકારજપગોચરા ॥ ૧૫॥

શ્રીંમન્ત્રપૂજિતાધ્યાતા શ્રીરાગસુન્દરી ધરી ।
શ્રીરાગસુસ્વરાગીતા શ્રીરાગવાગ્વિલાસિની ॥ ૧૬॥

શ્રીશ્ચ સરસ્વતીરૂપા શ્રીપઞ્ચદશમન્ત્રિણી ।
શ્રીષોડશાક્ષરીપૂજ્યા મન્ત્રપ્રકાશિની પરા ॥ ૧૭॥

સર્વાનન્દમયી વિદ્યા સર્વાનન્દપ્રદાયિની ।
સર્વાનન્દસુચક્રાભા સર્વાનન્દસુમઙ્ગલા ॥ ૧૮॥

શ્રીચક્રદેવતાયૈ ચ શ્રીપુરાયૈ સુમઙ્ગલમ્ ।
રસમેરુસુવાસિન્યૈ સદ્રસાયૈ સુમઙ્ગલમ્ ॥ ૧૯॥

મઙ્ગલં મન્ત્રવર્ણાયૈ શ્રીરાગિણ્યૈ સુમઙ્ગલમ્ ।
મઙ્ગલં મૂકવાગ્દાયૈ કાદમ્બર્યૈ સુમઙ્ગલમ્ ॥ ૨૦॥

ત્યાગરાજગુરુસ્વામિશિષ્યાપુષ્પાકૃતસ્તુતિઃ ।
અમ્બાપ્રીતા ગુરુપ્રેર્યા અમ્બાપાદસમર્પિતા ॥ ૨૧॥

અમ્બ નાન્યોપયુક્તાહં ત્વદ્ભક્તિકીર્તનં વિના ।
એતત્સદ્ભક્તિનૈવેદ્યં સ્વીકુરુષ્વ મદમ્બિકે ॥ ૨૨॥

ન્યૂનાનિચ્છિદ્રસર્વાણિ ક્ષમસ્વ પરદેવતે ।
સદા ત્વાં સંશ્રિતાહં મે ક્ષિપ્રં પ્રસીદ સાત્ત્વિકિ ॥ ૨૩॥

કાદિવિદ્યાં ન જાનામિ હાદિસાદિં ચ નામ્બિકે ।
જાનામિ ત્વં મદમ્બેતિ જાનામિ ત્વત્ પદાશ્રયમ્ ॥ ૨૪॥

શબ્દાવરણદુસ્તાપં હર મે પરમેશ્વરિ ।
શેષજીવનપર્યન્તં પ્રશાન્ત્યાવારયામ્બિકે ॥ ૨૫॥

કર્માનુબન્ધજાલાદ્વિમોચનં કુરુ પાવનિ ।
શુભોત્તુઙ્ગે નમસ્તુભ્યં જ્ઞાનં દેહિ સુનાદકમ્ ॥ ૨૬॥

મઙ્ગલં તે મદમ્બ શ્રીર્મયા સહ સદા વસ ।
મઙ્ગલૈતત્સુવાગ્દેવિ કુરુ મોક્ષસુમઙ્ગલમ્ ॥ ૨૭॥

મઙ્ગલં નાદમાતસ્તે મઙ્ગલં કમલામ્બિકે ।
મઙ્ગલં જ્ઞાનસૌભાગ્યે મોક્ષદે શુભમઙ્ગલમ્ ॥ ૨૮॥

કંદાયૈ કમલામ્બાયૈ કલગાયૈ સુમઙ્ગલમ્ ।
કલહંસસ્વરૂપિણ્યૈ કલ્યાણ્યૈ શુભમઙ્ગલમ્ ॥

ઇતિ સદ્ગુરુશ્રીત્યાગરાજસ્વામિનઃ શિષ્યયા ભક્તયા પુષ્પયા કૃતં
શ્રીકમલામ્બાપઞ્ચદશાક્ષરીસ્તોત્રં ગુરૌ સમર્પિતમ્ ।
ૐ શુભમસ્તુ ।

Encoded and proofread by N V Vathsan nvvathsan at gmail.com
Copyright Pushpa Srivatsan

*Shri Kamalamba Panchadashakshari Stotram*

This text is entirely original composition of Smt. Pushpa Srivatsan, and copyright Smt. Pushpa Srivatsan. All rights reserved by the author. 1) **Under no conditions** can either the whole or any part of this composition be **translated**, **adapted**, or **used for commercial purposes**. 2) Neither the whole nor any part of this composition can be reproduced, recorded, used in public perfomances, or distributed in any other way without **prior written permission** from the copyright holder, the author Smt. Pushpa Srivatsan (contact N V Vathsan nvvathsan@gmail.com).

pdf was typeset on September 27, 2022
Please send corrections to *sanskrit@cheerful.com*